# Shri Kashi Vishvanatha Suprabhatam

# શ્રીકાશીવિશ્વનાથસુપ્રભાતમ્

## Document Information


Text title : Kashi Vishvanatha Suprabhatam

File name : kAshivishvanAthasuprabhAtam.itx

Category : suprabhAta, shiva

Location : doc_shiva

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : December 21, 2021

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 21, 2021

*sanskritdocuments.org*

# શ્રીકાશીવિશ્વનાથસુપ્રભાતમ્

॥ શ્રીગુરુભ્યો નમઃ॥

વિશ્વેશં માધવં ઢુણ્ઢિં દણ્ડપાણિં ચ ભૈરવમ્ ।
વન્દે કાશીં ગુહાં ગઙ્ગાં ભવાનીં મણિકર્ણિકામ્ ॥ ૧॥

ઉત્તિષ્ઠ કાશિ ભગવાન્ પ્રભુવિશ્વનાથો
ગઙ્ગોર્મિ-સંગતિ-શુભૈઃ પરિભૂષિતોઽબ્જૈઃ ।
શ્રીઢુણ્ઢિ-ભૈરવ-મુખૈઃ સહિતાઽઽન્નપૂર્ણા
માતા ચ વાઞ્છતિ મુદા તવ સુપ્રભાતમ્ ॥ ૨॥

બ્રહ્મા મુરારિસ્ત્રિપુરાન્તકારિઃ
ભાનુઃ શશી ભૂમિસુતો બુધશ્ચ ।
ગુરુશ્ચ શુક્રઃ શનિ-રાહુ-કેતવઃ
કુર્વન્તુ સર્વે ભુવિ સુપ્રભાતમ્ ॥ ૩॥

વારાણસી-સ્થિત-ગજાનન-ઢુણ્ઢિરાજ
તાપત્રયાપહરણે પ્રથિત-પ્રભાવ ।
આનન્દ-કન્દલકુલ-પ્રસવૈકભૂમે
નિત્યં સમસ્ત-જગતઃ કુરુ સુપ્રભાતમ્ ॥ ૪॥

બ્રહ્મદ્રવોપમિત-ગાઙ્ગ-પયઃ-પ્રવાહૈઃ
પુણ્યૈઃ સદૈવ પરિચુંબિત-પાદપદ્મે ।
મધ્યે-ઽખિલામરગણૈઃ પરિસેવ્યમાને
શ્રીકાશિકે કુરુ સદા ભુવિ સુપ્રભાતમ્ ॥ ૫॥

પ્રત્નૈરસંખ્ય-મઠ-મન્દિર-તીર્થ-કુણ્ડ-
પ્રાસાદ-ઘટ્ટ-નિવહૈઃ વિદુષાં વરૈશ્ચ
આવર્જયસ્યખિલ-વિશ્વ-મનાંસિ નિત્યં
શ્રીકાશિકે કુરુ સદા ભુવિ સુપ્રભાતમ્ ॥ ૬॥ ।

કે વા નરા નુ સુધિયઃ કુધિયોऽધિયો વા
    વાઞ્છન્તિ નાન્તસમયે શરણં ભવત્યાઃ ।
હે કોટિ-કોટિ-જન-મુક્તિ-વિધાન-દક્ષે
શ્રીકાશિકે કુરુ સદા ભુવિ સુપ્રભાતમ્ ॥ ૭॥

યા દેવૈરસુરૈર્મુનીન્દ્રતનયૈર્ગન્ધર્વ-યક્ષોરગૈઃ
    નાગૈર્ભૂતલવાસિભિર્દ્વિજવરૈસ્સંસેવિતા સિદ્ધયે ।
યા ગઙ્ગોત્તરવાહિની-પરિસરે તીર્થૈરસંખ્યૈર્વૃતા
    સા કાશી ત્રિપુરારિરાજ-નગરી દેયાત્ સદા મઙ્ગલમ્ ॥ ૮॥

તીર્થાનાં પ્રવરા મનોરથકરી સંસાર-પારાપરા
    નન્દા-નન્દિ-ગણેશ્વરૈરુપહિતા દેવૈરશેષૈઃ-સ્તુતા ।
યા શંભોર્મણિ-કુણ્ડલૈક-કણિકા વિષ્ણોસ્તપો-દીર્ઘિકા
    સેયં શ્રીમણિકર્ણિકા ભગવતી દેયાત્ સદા મઙ્ગલમ્ ॥ ૯॥

અભિનવ-બિસ-વલ્લી પાદ-પદ્મસ્ય વિષ્ણોઃ
    મદન-મથન-મૌલેર્માલતી પુષ્પમાલા ।
જયતિ જય-પતાકા કાપ્યસૌ મોક્ષલક્ષ્મ્યાઃ
    ક્ષપિત-કલિ-કલઙ્કા જાહ્નવી નઃ પુનાતુ ॥ ૧૦॥

ગાઙ્ગં વારિ મનોહારિ મુરારિ-ચરણચ્યુતમ્ ।
ત્રિપુરારિ-શિરશ્ચારિ પાપહારિ પુનાતુ મામ્ ॥ ૧૧॥

વિઘ્નાવાસ-નિવાસકારણ-મહાગણ્ડસ્થલાલંબિતઃ
સિન્દૂરારુણ-પુઞ્જ-ચન્દ્રકિરણ-પ્રચ્છાદિ-નાગચ્છવિઃ ।
શ્રીવિઘ્નેશ્વર-વલ્લભો ગિરિજયા સાનન્દમાનન્દિતઃ (પાઠભેદ વિશ્વેશ્વર)
સ્મેરાસ્યસ્તવ ઢુણ્ઢિરાજ-મુદિતો દેયાત્ સદા મઙ્ગલમ્ ॥ ૧૨॥

કણ્ઠે યસ્ય લસત્કરાલ-ગરલં ગઙ્ગાજલં મસ્તકે
વામાઙ્ગે ગિરિરાજરાજ-તનયા જાયા ભવાની સતી ।
નન્દિ-સ્કન્દ-ગણાધિરાજ-સહિતઃ શ્રીવિશ્વનાથપ્રભુઃ
કાશી-મન્દિર-સંસ્થિતોऽખિલગુરુઃ દેયાત્ સદા મઙ્ગલમ્ ॥ ૧૩॥

શ્રીવિશ્વનાથ કરુણામૃત-પૂર્ણ-સિન્ધો
    શીતાંશુ-ખણ્ડ-સમલંકૃત-ભવ્યચૂડ ।
ઉત્તિષ્ઠ વિશ્વજન-મઙ્ગલ-સાધનાય
    નિત્યં સર્વજગતઃ કુરુ સુપ્રભાતમ્ ॥ ૧૪॥

શ્રીવિશ્વનાથ વૃષભ-ધ્વજ વિશ્વવન્દ્ય
    સૃષ્ટિ-સ્થિતિ-પ્રલય-કારક દેવદેવ ।
વાચામગોચર મહર્ષિ-નુતાઙ્ઘ્રિ-પદ્મ
    વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૧૫॥

શ્રીવિશ્વનાથ ભવભઞ્જન દિવ્યભાવ
    ગઙ્ગાધર પ્રમથ-વન્દિત સુન્દરાઙ્ગ ।
નાગેન્દ્ર-હાર નત-ભક્ત-ભયાપહાર
    વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૧૬॥

શ્રીવિશ્વનાથ તવ પાદયુગં નમામિ
    નિત્યં તવૈવ શિવ નામ હૃદા સ્મરામિ ।
વાચં તવૈવ યશસાઽનઘ ભૂષયામિ
    વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૧૭॥

કાશી-નિવાસ-મુનિ-સેવિત-પાદ-પદ્મ
    ગઙ્ગા-જલૌઘ-પરિષિક્ત-જટાકલાપ ।
અસ્યાખિલસ્ય જગતઃ સચરાચરસ્ય
    વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૧૮॥

ગઙ્ગાધરાદ્રિતનયા-પ્રિય શાન્તમૂર્તે
    વેદાન્ત-વેદ્ય સકલેશ્વર વિશ્વમૂર્તે ।
કૂટસ્થ નિત્ય નિખિલાગમ-ગીત-કીર્તે
    વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૧૯॥

વિશ્વં સમસ્તમિદમદ્ય ઘનાન્ધકારે
    મોહાત્મકે નિપતિતં જડતામુપેતમ્ ।
ભાસા વિભાસ્ય પરયા તદમોઘ-શક્તે
    વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૨૦॥

સૂનુઃ સમસ્ત-જન-વિઘ્ન-વિનાસ-દક્ષો
    ભાર્યાઽન્નદાન-નિરતા-ઽવિરતં જનેભ્યઃ ।
ખ્યાતઃ સ્વયં ચ શિવકૃત્ સકલાર્થિ-ભાજાં
    વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૨૧॥

યે નો નમન્તિ ન જપન્તિ ન ચામનન્તિ

નો વા લપન્તિ વિલપન્તિ નિવેદયન્તિ ।
તેષામબોધ-શિશુ-તુલ્ય-ધિયાં નરાણાં
વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૨૨॥

શ્રીકણ્ઠ કણ્ઠ-ધૃત-પન્નગ નીલકણ્ઠ
સોત્કણ્ઠ-ભક્ત-નિવહોપહિતોપ-કણ્ઠ ।
ભસ્માઙ્ગરાગ-પરિશોભિત-સર્વદેહ
વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૨૩॥

શ્રીપાર્વતી-હૃદય-વલ્લભ પઞ્ચ-વક્ત્ર
શ્રીનીલ-કણ્ઠ નૃ-કપાલ-કલાપ-માલ ।
શ્રીવિશ્વનાથ મૃદુ-પઙ્કજ-મઞ્જુ-પાદ
વારાણસીપુરપતે કુરુ સુપ્રભાતમ્ ॥ ૨૪॥

દુગ્ધ-પ્રવાહ-કમનીય-તરઙ્ગ-ભઙ્ગે
પુણ્ય-પ્રવાહ-પરિપાવિત-ભક્ત-સઙ્ગે ।
નિત્યં તપસ્વિ-જન-સેવિત-પાદ-પદ્મે
ગઙ્ગે શરણ્ય-શિવદે કુરુ સુપ્રભાતમ્ ॥ ૨૫॥

સાનન્દમાનન્દ-વને વસન્તં આનન્દ-કન્દં હત-પાપ-વૃન્દમ્ ।
વારાણસી-નાથમનાથ-નાથં શ્રીવિશ્વનાથં શરણં પ્રપદ્યે ॥ ૨૬॥

ઇતિ શ્રીકાશીવિશ્વનાથસુપ્રભાતં સમ્પૂર્ણમ્ ।

Shri Kashi Vishwanatha Suprabhatam
Encoded and proofread by N. Balasubramanian

---

*Shri Kashi Vishvanatha Suprabhatam*
pdf was typeset on December 21, 2021

Please send corrections to *sanskrit@cheerful.com*